# Shri Raghavendra AshtAkshara Stotram

# શ્રીરાઘવેન્દ્રાષ્ટાક્ષરસ્તોત્રમ્

## Document Information

Text title : Raghavendra AshtAkshara Stotram

File name : rAghavendrAShTAkSharastotram.itx

Category : raama

Location : doc_raama

Author : jagannAthadAsa

Latest update : December 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2021

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રાષ્ટાક્ષરસ્તોત્રમ્

ગુરુરાજાષ્ટાક્ષરં સ્યાત્ મહાપાતકનાશનમ્ ।
એકૈકેમક્ષરં ચાત્ર સર્વ કામ્યાર્થ સિદ્ધિદમ્ ॥ ૧॥

રકારોચ્ચારણ માત્રેણ રોગહાનિર્ન સંશયઃ ।
ઘકારેણ બલં પુષ્ટિઃ આયુઃ તેજશ્ચ વર્ધતે ॥ ૨॥

વકારેણાત્ર લભતે વાઞ્છિતાર્થાન્ન સંશયઃ ।
દ્રકારણાઘરાશિસ્તુ દ્રાવ્યતે દ્રુતમેવ હિ ॥ ૩॥

યકારેણ યમાદ્બાધો વાર્યતે નાત્ર સંશયઃ ।
નકારેણ નરેન્દ્રાણાં પદમાપ્નોતિ માનવઃ ॥ ૪॥

મકારેણૈવ માહેન્દ્રમૈશ્વર્યં યાતિ માનવઃ ।
ગુરોર્નામ્નાશ્ચ માહાત્મ્યં અપૂર્વં પરમાદ્ભુતમ્ ॥ ૫॥

તન્નામ સ્મરણાદેવ સર્વાભિષ્ટં પ્રસિધ્યતિ ।
તસ્માન્નિત્યં પઠેદ્ ભક્ત્યા ગુરુપાદરતસ્સદા ॥ ૬॥

શ્રી રાઘવેન્દ્રાય નમઃ ઇત્યાષ્ટાક્ષર મન્ત્રતઃ ।
સર્વાન્કામાનવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૭॥

અષ્ટોત્તરશતાવૃત્તિં સ્તોત્રસ્યાસ્ય કરોતિ યઃ ।
તસ્ય સર્વાર્થ સિદ્ધિસ્યાત્ ગુરુરાજપ્રસાદતઃ ॥ ૮॥

એતદષ્ટાક્ષરસ્યાત્ર માહાત્મ્યં વેત્તિ કઃ પુમાન્ ।
પઠનાદેવ સર્વાર્થ સિદ્ધિર્ભવતિ નાન્યથા ॥ ૯॥

સ્વામિના રાઘવેન્દ્રાખ્ય ગુરુપાદાબ્જ સેવિના ।
કૃતમષ્ટાક્ષરસ્તોત્રં ગુરુપ્રીતિકરં શુભમ્ ॥ ૧૦॥

॥ ઇતિ શ્રીગુરુજગન્નાથદાસાર્યવિરચિતં શ્રીરાઘવેન્દ્રાષ્ટાક્ષરસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shri Raghavendra AshtAkshara Stotram*

pdf was typeset on December 23, 2021

Please send corrections to *sanskrit@cheerful.com*